UNIVERSITY OF
CAMBRIDGE

ORIENTAL STUDIES TRIPOS Part II

South Asian Studies

---

Friday 5 June 2009 09.00 – 12.00

---

**SA.12 SANSKRIT SPECIFIED TEXTS, 2**

*Candidates should answer **all** questions.*

*Write your number **not** your name on the cover sheet of **each** Answer Book.*

**STATIONERY REQUIREMENTS**
*20 Page Answer Book x 1*
*Rough Work Pad*

**You may not start to read the questions printed on the subsequent pages of this question paper until instructed that you may do so by the Invigilator.**

1 Translate into ENGLISH: (25 marks)

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि । नामाख्याते चोपसर्गनिपाताश्च । तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च । न सर्वाणीति गार्ग्यो वैयाकरणानां चैके तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन विकरेणान्वितौ स्याताम् । संविज्ञातानि तानि यथा गौरश्वः पुरुषो हस्तीति । अथ चेत्सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन् । यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्यात् । यत्किञ्चित्तृंद्यात्तृणं तत् । अथापि चेत्सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात् । तत्रैवं स्थूणा दरशया वा संजनी च स्यात् ॥ १२ ॥
अथापि य एषां न्यायवान्कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन् । पुरुषं पुरिशय इत्याचक्षीरन् । अष्टेत्यश्वम् । तर्दनमिति तृणम् । अथापि निष्पन्ने ऽभिव्याहारे ऽभिविचारयन्ति । प्रथनात्पृथिवीत्याहुः । क एनामप्रथयिष्यत् । किमाधारश्चेति । अथानन्विते ऽर्थे ऽप्रादेशिके विकारे पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायनः । एतेः कारितं च यकारादिं चान्तकरणमस्तेः शुद्धं च सकारादिं च । अथापि सत्त्वपूर्वो भाव इत्याहुः । अपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति । तदेतन्नोपपद्यते ॥ १३ ॥

*Nirukta* 1.12–13

2 (*a*) Discuss briefly the following rules from the *Aṣṭādhyāyī*: (15 marks)

1.1.7 *halo 'nantarāḥ saṃyogaḥ*
1.1.8 *mukhanāsikāvacano 'nunāsikaḥ*
1.1.45 *ig yaṇaḥ saṃprasāraṇam*
1.1.49 *ṣaṣṭhī sthāneyogā*
1.4.25 *bhītrārthānāṃ bhayahetuḥ*

(*b*) Translate into ENGLISH: (10 marks)

स्वतन्त्रः कर्ता ॥ ५४ ॥
स्वतन्त्रः इति प्रधानभूत उच्यते। अगुणीभूतो यः क्रियासिद्धौ स्वातन्त्र्येण विवक्ष्यते तत्कारकं कर्तृसंज्ञं भवति। देवदत्तः पचति। स्थाली पचति। कर्तृप्रदेशाः 'कर्तृकरणयोस्तृतीया' इत्येवमादयः॥
तत्प्रयोजको हेतुश्च ॥ ५५ ॥
तत् इति अनन्तरः कर्ता परामृश्यते। तस्य प्रयोजकस्तत्प्रयोजकः। निपातनात्समासः। स्वतन्त्रस्य प्रयोजको यो ऽर्थः तत्कारकं हेतुसंज्ञं भवति। चकारात्कर्तृसंज्ञं च। संज्ञासमावेशार्थश्चकारः। कुर्वाणं प्रयुङ्क्ते कारयति। हारयति। हेतुत्वाद् णिचो निमित्तं कर्तृत्वाच्च कर्तृप्रत्ययेनोच्यते। हेतुप्रदेशाः 'हेतुमति च' इत्येवमादयः॥

*Aṣṭādhyāyī* 1.4.54–55 with *Kāśikāvṛtti*.

3 Translate into ENGLISH (do not translate incomplete citations from the Saṃhitā): (10 marks)

अथोत्तरं शालाखण्डमग्रेण स्फ्येनोद्धत्यावोक्ष्य सिकता निवपति । तं परिमण्डलं खरं करोति । अथैनं सिकताभिराभ्राशिनं करोति । तं कुशतरुणकैर्दूर्वाग्रन्थिभिरिति संप्रच्छाद्याथैनं परिश्रयन्ति । तस्योदीचीं द्वारं कुर्वन्ति । तदुपसादयत्यर्मकपालानि शर्करा अवाञ्जनपिष्टा अजलोमानि कृष्णाजिनलोमानि सूनामधिकरणीमुखाकृतं कुशलमिति । अथैतावश्वगर्दभावग्रेण शालां पल्पूलितौ तिष्ठतः । अन्तर्वेद्यभ्रिं निदधात्युत्तरे वेद्यन्ते रशने । परिस्तृणन्ति । दक्षिणत उपविशतो ब्रह्मा च यजमानश्च । अथ गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वाहवनीये सावित्राणि जुहोत्यन्वारब्धे यजमाने ॥१॥ युञ्जानः प्रथमं मन इति षड्चो ऽनन्तर्हिता देव सवितरित्यृगेषेमं नो देव सवितरिति यजुरेतत् । ऋचा वा यजुषा वावस्यति । आहुतिं नवमीं हुत्वोपतिष्ठत ऋचा स्तोमं समर्धयेति ।

*Baudhāyanaśrautasūtra* 10.1–2

4 Translate into ENGLISH: (20 marks)

[a] yuñjānáḥ prathamáṃ mánas tatvā́ya savitā́ dhíyaḥ | agníṃ jyótir nicā́yya pṛthivyā́ ádhy ā́bharat | [b] yuktvā́ya mánasā devā́nt súvar yató dhiyā́ dívam | bṛháj jyótiḥ kariṣyatáḥ savitā́ prá suvāti tā́n || [c] yukténa mánasā vayáṃ devásya savitúḥ savé | suvargéyāya śáktyai | [d] yuñjáte mána utá yuñjate dhíyo víprā víprasya bṛható vipaścítaḥ | ví hótrā dadhe vayunāvíd éka ít || 1 || mahī́ devásya savitúḥ páriṣṭutiḥ || [e] yujé vāṃ bráhma pūrvyáṃ námobhir ví ślókā yanti pathyèva sū́rāḥ | śṛṇvánti víśve amṛ́tasya putrā́ ā́ yé dhā́māni divyā́ni tasthúḥ || [f] yásya prayā́ṇam ánv anyá íd yayúr devā́ devásya mahimā́nam árcataḥ | yáḥ pā́rthivāni vimamé sá étaśo rájāṃsi deváḥ savitā́ mahitvanā́ || [g] déva savitaḥ prá suva yajñáṃ prá suva || 2 || yajñápatiṃ bhágāya, divyó gandharváḥ ketapū́ḥ kétaṃ naḥ punātu vācás pátir vā́cam adyá svadāti naḥ || [h] imáṃ no deva savitar yajñáṃ prá suva devāyúvaṃ sakhivídaṃ satrājítaṃ dhanajítaṃ suvarjítam | [i] ṛcā́ stómaṃ sám ardhaya gāyatréṇa rathaṃtaráṃ | bṛhád gāyatrávartani ||

*Taittirīyasaṃhitā* 4.1.1.1–2

5 Translate into ENGLISH: (20 marks)

sāvitrā́ṇi juhoti, prásūtyai. caturgṛhīténa juhoti, cátuṣpādaḥ paśávaḥ, paśū́n evā́va runddhe; cátasro díśo, dikṣv èvá práti tiṣṭhati. chándāṃsi devébhyó 'pā krāman: ná vo 'bhāgā́ni havyáṃ vakṣyāma íti, tébhya etác caturgṛhītám adhārayan, puro'nuvākyā̀yai yājyā̀yai devátāyai vaṣaṭkārā́ya; yác caturgṛhītáṃ juhóti chándāṃsy evá tát prīṇāti, tā́ny asyá prītā́ni devébhyo havyáṃ vahanti. yáṃ kāmáyeta: || 1 || pā́pīyānt syād íty ékaikaṃ tásya juhuyād, ā́hutībhir evaínam ápa gṛhṇāti pā́pīyān bhavati. yáṃ kāmáyeta: vásīyānt syād íti sárvāṇi tásyānudrútya juhuyād, ā́hutyaivaínam abhí kramayati vásīyān bhavaty; átho yajñásyaivaíṣā́bhikrāntir. éti vā́ eṣá yajñamukhā́d ṛ́ddhyā yò 'gnér devátāyā éty; aṣṭā́v etā́ni sāvitrā́ṇi bhavanti, aṣṭā́kṣarā gāyatrī́, gāyatráḥ || 2 || agnís, ténaivá yajñamukhā́d ṛ́ddhyā agnér devátāyai naíty; aṣṭaú sāvitrā́ṇi bhavanti ā́hutir navamī́, trivṛ́tam evá

(TURN OVER

yajñamukhé ví yātayati. yádi kāmáyeta: chándāṃsi yajñayaśasénārpayeyam íty ŕcam antamā́ṃ kuryāc, chándāṃsy evá yajñayaśasénārpayati. yádi kāmáyeta: yájamānaṃ yajñayaśasénārpayeyam íti yájur antamā́ṃ kuryād, yájamānam evá yajñayaśasénārpayaty. ṛcā́ stómaṃ sám ardhayéti || 3 || āhá, sámṛddhyai.

*Taittirīyasaṃhitā* 5.1.1.1–4

END OF PAPER